कार्य्याणां च विनिर्णयः" मनुः। "पुरा रामभयादेव तापस्यं समुपाश्रितः" भा० व० २७६ अ०।

**तापहर** त्रि० तापं हरति हृ–ट। तापनाशके। स्त्रियां ङीप् ङीबन्तः। २व्यञ्जनभेदे (ताहरी) भाव० प्र० "इते हरिद्रासंयुक्ता मांसानां भर्जयेद्वटीः। तण्डुलांश्चापि निर्द्धौतान् सहैव परिभर्जयेत्। सिद्धियोग्यं जलं तत्र प्रक्षिप्य कुशलः पचेत्। लवणार्द्रकहिङ्गूनि मात्रया तत्र निःक्षिपेत्। एषा सिद्धिं समायाता प्रोक्ता तापहरी बुधैः"। अस्या गुणाः। "भवेत् तापहरी बल्या हृष्या श्लेष्माणमाहरेत्। बृंहणी तर्पणी रुच्या गुर्वी तत्र गुणाः स्मृताः"

**तापिक** त्रि० तापे तापकाले भवं ठञ्। ग्रीष्मभवे जलादौ न०।

**तापिच्छ(ञ्ज)** पु० तापिनं छादयति जयति वा छद+जि-वा ड पृषो०। १तमालवृक्षे अमरः। "अच्छोर्निचिपदञ्जनं श्रवणयोस्तापिच्छगुच्छावलीम्" गी०गो० "प्रफुल्लतापिच्छनिभैरभीषुभिः" माघः। २धातुमाक्षिके राजनि०

**तापिन्** त्रि० तापयति तापि–णिनि। १तापके तप–णिनि। २तापयुक्ते त्रि० स्त्रियां वा ङीप्। ३बुद्धदेवे पु०त्रिका०

**तापी** स्त्री तापयति रुच् गौरा० ङीष्। विन्ध्याचलस्थे पश्चिमवाहिनदीभेदे राजनि०। सा च माक्षिकधातूद्भवस्थानसन्निकृष्टा। २यमुनायां त्रिका०।

**तापीज** पु० ताप्या नद्याः समीपे आकरभेदे जायते जन–ड। माक्षिकधातौ "एवञ्च माक्षिकं धातु तापीजमततोपमम्। मधुरं काञ्चनाभासमम्लं वा रजतप्रभम्। पिबन् हन्ति जराकुष्ठमेहानाहामयक्षयान्" सुश्रुतः तापीसम्भवताप्यताप्युद्भवादयोऽप्यत्र।

**तापेश्वर** पु० तीर्थभेदे हेम० शि० पु०।

**ताम** पु० ताम्यत्यनेन तम–करणे घञ्। १भीषणे २दोषे च अजयपालः।३ग्लानिकारके त्रि०भावे घञ्।४ग्लानौ पु०

**तामर** न० तामं ग्लानिं रवते हिनस्ति रुङ्–बधे वा० ड १जले २घृते च भरतधृतरुद्रः।

**तामरस** न० तामरे जले सस्ति सस–ड। १पद्मे, ताम्यतेऽनेन रस्यते इति रसम् कर्म०। २स्वर्णे ३ताम्रे च मेदि०। ४धुस्तूरे,अमरः "इह वद तामरसं नजजायः" छ० र० उक्ते ५द्वादशाक्षरपादके छन्दोभेदे च। "ताम्यतस्तामरसान्तराभाम्" "स्तनवता नवतामरसाननः" "विकचतामरसा गृहदीर्घिकाः" रघुः। "नवरतमन्दरागतामरसदृशः" माघः। ५पद्मिन्यां स्त्री ङीप्। "यथा गजस्तामरसीं मदोत्कटः" भारते विराटपर्वणि ७ अ०।

**तामलकी** स्त्री तम णिच्–क्विप् तान् कर्म०। भूम्यामलक्याम्। अमरः। "कटुकेन्द्रयवोशीरसिंहीतामलकीघनैः" सुश्रुतः

**तामलिप्त** पु० (तमलुक) देशभेदे त्रिका०। स्वार्थे क। तत्रार्थे। स च देशः वृ०सं० १४ अ० कूर्मविभागे प्राच्यामुक्तः "अथ पूर्वस्याम्" इत्युपक्रमे "एकपादताम्रलिप्तककोशलकावर्द्धमानश्च"। गौरा० ङीष् तत्रार्थे स्त्री।

**तामस** त्रि० तमोऽस्त्यस्य तमः, प्रधानत्वेनास्त्यस्य वा अण्। १तमोगुणयुक्ते २तमःप्रधानगुणके स्त्रियां ङीप्। ३सर्पे पुंस्त्री० जातित्वात् ङीष्। ४खले त्रि० मेदि० ५उलूके पुंस्त्री राजनि० स्त्रियां ङीप्। ६चतुर्थे मनौ पु० "सत्या देवगणाश्चैव तामसस्यान्तरे मनोः। पुत्रांश्चैव प्रवक्ष्यामि तामसस्य मनोर्नृप!। द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोऽशनः। तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः। तामसस्य मनोरेते दश पुत्रा महाबलाः" हरिवं० ७अ०। "चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः। पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः। सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः। ज्योतिर्धामादयः सप्त ऋषयस्तामसेऽन्तरे। देवा वैधृतयो नाम विधृतेस्तनया नृप!। नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा। भाग० ८।१।२४। भागवते अन्यथोक्तं कल्पभेदादविरुद्धम्। तमोऽधिकृत्य प्रवृत्तम् अण् तमसा कृता या अण्। ७तमोगुणाधिकारेण प्रवृत्ते शास्त्रे ८तमसाकृते च स्त्रियां ङीप्। तामसशास्त्राणि च पद्मपुराणे पार्वतीं प्रतीश्वरवाक्येनोक्तानि यथा

"शृणु देवि! प्रवक्ष्यामि तामसानि यथाक्रमम्। येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि। प्रथमं हि मयैवोक्तं शैवं पाशुपताभिधम्। मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततःपरम्। कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत्। गौतमेन तथा न्यायं साङ्ख्यन्तु कपिलेन वै। द्विजन्मना जैमिनिना पूर्वं वेदमयार्थतः। निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम्। धिषणेन च संप्रोक्तं चार्वाकमतिगर्हितम्। दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा। बौद्धशास्त्रमसत् प्रोक्तं नग्ननीलपटादिकम्। मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च। मयैव कथितं देवि! कलौ ब्राह्मणरूपिणा। अपार्थं श्रुतिवाक्यानां दर्शयल्लोकगर्हितम्। कर्मस्वरूपत्याज्यत्वमत्र च प्रतिपाद्यते। सर्वकर्मपरिभ्रंशान्नैष्कर्म्यं तत्र